# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा - शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ५ | |
|---|---|---|
| विषयः - वेदः | (CC-2.3.5.New) | गुणाः - ७० |
| दिनाङ्कः - ०८/१२/२०१८ | ग्रन्थः याज्ञवल्क्यशिक्षा | समयः -०२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नाङ्कितश्लोकेषु कयोः द्वयोः व्याख्या कार्या ।** **( १० )**

(१) वैश्यन्तुस्वरितं विद्याद् भारद्वाजमुदात्तकम् ।
नीचं गौतममित्याहुर्गार्ग्यं च स्वरितं विदुः ॥

(२) प्रणवं तु प्लुतं कुर्याद् व्याहृतीर्म्मात्रिका विदुः ।
चाषस्तु वदते मात्रां द्विमात्रं वायसोऽब्रवीत् ॥

(३) हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुः सामभिर्दग्धो वियोनिमधिगच्छति ।

**प्रश्नः २ कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** **( १० )**

(१) वर्णोच्चारणविधिं निर्दिश्य पदोच्चारणविधिः प्रस्तूयताम् ।

(२) संहिता–पद–क्रमपाठानां विशिष्टं फलं प्रतिपादयत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नाङ्कितश्लोकेषु कयोः द्वयोः व्याख्या कार्या ।** **( १० )**

(१) ककारान्ते टकारान्ते ङणे तर्जनिकां नमेत् ।
पञ्चाङ्गुल्यं पकारे च तकारे कुण्डलाकृतिः ॥

(२) यथा बालस्य सर्पस्य निःश्वासो लघुचेतसः ।
एवमूष्मा प्रयोक्तव्या हकारपरिवर्जिता ॥

(३) स्वरिते त्र्यङ्गुलं विद्यान्निपाते तु षडङ्गुलम् ।
उत्थाने तु नवाङ्गुल्यमेतत्स्वारस्य लक्षणम् ॥

**प्रश्नः ४ कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** **( १० )**

(१) कतिविधाः स्वरित(स्वर)भेदाः ? के च ते ? कानि च लक्षणानि ?

(२) कतिवधाः उष्मा भवति ? तासां प्रचितादीनां कुत्रोपयोग : ?

## तृतीयान्वितिः

**प्रश्नः ५ कयोः द्वयोः सविस्तरमुत्तरं ददतु ।** **( १० )**

(१) अवग्रहे पदच्छेदे उदात्तो दृश्यते यदि ।
स्वरान्तं स्वरितं प्राहुः सन्धौ तु स्वार्दते परम् ॥

(२) प्रथमा यत्र दृश्यन्ते सन्धिस्थानेषु पूर्वतः ।
स्ववर्गीयेण संयुक्ता मोक्षं तत्र न कारयेत् ॥

(३) नकारान्ते पदे पूर्वे श्मश्रुभिः परतः स्थिते ।
छकारं न प्रयुञ्जीत 'ञश' सन्धि समुच्यते ॥

**प्रश्नः ६ कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** **( १० )**

(१) नकारविकारस्य प्रतिषेधः ।

(२) ॐकारस्य कति प्लुतस्थानानि ।

## चतुर्थान्वितिः

**प्रश्नः ७ दशानामेवोत्तरं ददत ।** **( १० )**

(१) अन्तस्थस्वराणां वर्णः कः ?

(२) सन्धेः कति प्रकाराः सन्ति ?

(३) हकारोष्माणश्च वर्णः कः ?

(४) अकारादीनां देवः कः ?

(५) विवृतेः कति भेदाः सन्ति ?

(६) कतिविधाः स्वरभक्तयः ?

(७) उदात्तस्वरस्य छन्दः कः ?

(८) कस्य स्वरस्य गौतमगोत्रः ?

(९) स्वरितस्वरस्य को वर्णः ?

(१०) उच्चौनिषादः . . . . . . . . . . . . ।

(११) केन पाठेन सरस्वत्याः स्नानफलं भवति ?

(१२) सूक्ष्मपदप्राप्तिः केन पाठेन भवति ?

(१३) यथा वाणी तथा . . . . . . . . . . . ।

(१४) नामपदस्य देवः कः ?

(१५) शिखी वदति . . . . . . . . . . . . . ।

--००--